ॐ

# दीर्घायुष्य्–सूक्तः

(अथर्ववेद पैप्पलाद शाखा)

सं मा सिञ्चन्तु मरुतः सं पूषा सं बृहस्पतिः ।
सं मायमग्निः सिञ्चन्तु प्रजया च धनेन च ।
दीर्घमायुः कृणोतु मे ॥ १ ॥

सं मा सिञ्चन्त्वादित्याः सं मा सिञ्चन्त्वग्नयः ।
इन्द्रः समस्मान् सिञ्चन्तु प्रजया च धनेन च ।
दीर्घमायुः कृणोतु मे ॥ २ ॥

सं मा सिञ्चन्त्वरुषः समर्का ऋषयश्च ये ।
पूषाः समस्मान् सिञ्चन्तु प्रजया च धनेन च ।
दीर्घमायुः कृणोतु मे ॥ ३ ॥

सं मा सिञ्चन्तु गन्धर्वाप्सरसः सं मा सिञ्चन्तु देवताः ।
भगः समस्मान् सिञ्चन्तु प्रजया च धनेन च ।
दीर्घमायुः कृणोतु मे ॥ ४ ॥

सं मा सिञ्चन्तु पृथिवी सं मा सिञ्चन्तु या दिवः ।
अन्तरिक्षं समस्मान् सिञ्चन्तु प्रजया च धनेन च ।
दीर्घमायुः कृणोतु मे ॥ ५ ॥

सं मा सिञ्चन्तु प्रदिशः सं मा सिञ्चन्तु या दिशः ।
आशाः समस्मान् सिञ्चन्तु प्रजया च धनेन च ।
दीर्घमायुः कृणोतु मे ॥ ६ ॥

सं मा सिञ्चन्तु कृषयः सं मा सिञ्चन्त्वोषधीः ।
सोमः समस्मान् सिञ्चन्तु प्रजया च धनेन च ।
दीर्घमायुः कृणोतु मे ॥ ७ ॥

सं मा सिञ्चन्तु नद्यः सं मा सिञ्चन्तु सिन्धवः ।
समुद्रः समस्मान् सिञ्चन्तु प्रजया च धनेन च ।
दीर्घमायुः कृणोतु मे ॥ ८ ॥

सं मा सिञ्चन्त्वापः सं मा सिञ्चन्तु कृष्टयः ।
सत्यं समस्मान् सिञ्चन्तु प्रजया च धनेन च ।
दीर्घमायुः कृणोतु मे ॥ ९ ॥

ॐ

# रोगनिवारण–सूक्तः

(अथर्ववेद चतुर्थ काण्डः १३औं सूक्त तथा ऋग्वेदको दशम मण्डलको १३७औं सूक्त)

उत देवा अवहितं देवा उन्नयथा पुनः ।
उतागश्चक्रुषं देवा देवा जीवयथा पुनः ॥ १॥

द्वाविमौ वातौ वात आ सिन्धोरा परावतः ।
दक्षं ते अन्य आवातु व्यन्यो वातु यद्रपः ॥ २ ॥

आ वात वाहि भेषजं वि वात वाहि यद्रपः ।
त्वं हि विश्वभेषज देवानां दूत ईयसे ॥ ३ ॥

त्रायन्तामिमं देवास्त्रायन्तां मरुतां गणाः ।
त्रायन्तां विश्वा भूतानि यथायमरपा असत् ॥ ४ ॥

आ त्वागमं शंतातिभिरथो अरिष्टतातिभिः ,
दक्षं त उग्रमाभारिषं परा यक्ष्मं सुवामि ते ॥ ५ ॥

अयं मे हस्तो भगवानयं मे भगवत्तर ।
अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ॥ ६ ॥

हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी ।
अनामयित्नुभ्यां हस्ताभ्यां ताभ्यां त्वाभि मृशामसि ॥ ७ ॥